# Shri Ambika Stava

# શ્રી અમ્બિકાસ્તવઃ

## Document Information

Text title : Shri Ambika Stava 08 07

File name : ambikAstavaH.itx

Category : devii, devI, pArvatI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-07

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# શ્રી અમ્બિકાસ્તવઃ

શ્રીગિરીશપ્રિયાં ચિન્તિતાર્થપ્રદાં
    રત્નતાટઙ્કિનીં રાજબિમ્બાનનામ્ ।
સૈરિભેન્દ્રાદિમત્તેભપઞ્ચાનના-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૧॥

વારુણીસેવિતાં કીરવાણીસ્તુતાં
    શત્રુસંહારિણીં શ્રેયસઃ કારિણીમ્ ।
વારુણીપારણાં ચારુસઞ્ચારિણી-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૨॥

સત્રયીકોણમધ્યસ્થબિન્દૂપરિ-
    પ્રસ્ફુરદ્રત્નસિંહાસનાધિષ્ઠિતામ્ ।
સર્વસૌભાગ્યસન્ધાયિનીં માયિની-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૩॥

માતૃકાભિઃ પરીવારિતાં કિઞ્ચિદુ-
    ન્મીલતાં ધીવરપ્રેક્ષણાનન્દિનીમ્ ।
મત્તમાતઙ્ગકુમ્ભોરુવક્ષોરુહા-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૪॥

યક્ષગન્ધર્વસિદ્ધાઙ્ગનામૌલિગ-
    ર્ભસ્થસૂનાતિસંવાસિતાઙ્ઘ્રિદ્વયમ્ ।
માતૃકારૂપિણીં માતૃયન્ત્રાત્મિકા-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૫॥

વીરમાહેશ્વરીં ચારુધર્મક્રિયાં
    પારગાત્રાન્તરાગારસંવાસિનીમ્ ।
કિઙ્કરાશેષસમ્પત્કરીં શાઙ્કરી-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૬॥

ઐન્દ્રવજ્રાદિકાન્તિચ્છટારઞ્જિનીં
    શેખરીભૂતશુક્લેન્દુરેખાભરામ્ ।
મઞ્જુમઞ્જીરશિઞ્જત્પદામ્ભોરુહા-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૭॥

વામહસ્તેન જિહ્વાઞ્ચલાં વૈરિણઃ
    પાણિના દક્ષિણેનાયુધં મુદ્ગરમ્ ।
બિભ્રતીં પીતવર્ણા (મ્બરા)લઙ્કૃતા-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૮॥

પુસ્તકં પાશમક્ષસજં ચાઙ્કુશં
    દોર્લતાભિર્દધાનાં ત્રિનેત્રાન્વિતામ્ ।
બાલિકાં ત્રૈપુરીપુણ્ડરીકપ્રભા-
    માપદુત્તારિણીભમ્બિકામાશ્રયે ॥ ૨॥

બ્રહ્મશૌરીન્દ્રમુખ્યામરપ્રાપ્તના-
    નાયુધાચ્છાનનાં સ્રગ્વિભૂષાન્વિતામ્ ।
ભર્ગપત્નીં સુદુર્ગામભીષ્ટપ્રદા-
    માપદુત્તારિણીમમ્બિકામાશ્રયે ॥ ૧૦॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યવિરચિતમમ્બિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

---

*Shri Ambika Stava*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*